# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय १८

तांस्तु तेऽहं प्रवक्ष्यामि प्रेक्षमाणस्य यूथपान् ।
राघवार्थे पराक्रान्ता ये न रक्षन्ति जीवितम् ॥ १॥

स्निग्धा यस्य बहुश्यामा बाला लाङ्गूलमाश्रिताः ।
ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः ॥ २॥

प्रगृहीताः प्रकाशन्ते सूर्यस्येव मरीचयः ।
पृथिव्यां चानुकृष्यन्ते हरो नामैष यूथपः ॥ ३॥

यं पृष्ठतोऽनुगच्छन्ति शतशोऽथ सहस्रशः ।
द्रुमानुद्यम्य सहिता लङ्कारोहणतत्पराः ॥ ४॥

एष कोटीसहस्रेण वानराणां महौजसाम् ।
आकाङ्क्षते त्वां सङ्ग्रामे जेतुं परपुरञ्जय ॥ ५॥

नीलानिव महामेघांस्तिष्ठतो यांस्तु पश्यसि ।
असिताञ्जनसङ्काशान्युद्धे सत्यपराक्रमान् ॥ ६॥

नखदंष्ट्रायुधान्वीरांस्तीक्ष्णकोपान्भयावहान् ।
असङ्ख्येयाननिर्देश्यान्परं पारमिवोदधेः ॥ ७॥

पर्वतेषु च ये के चिद्विषमेषु नदीषु च ।
एते त्वामभिवर्तन्ते राजन्नृक्षाः सुदारुणाः ॥ ८॥

एषां मध्ये स्थितो राजन्भीमाक्षो भीमदर्शनः ।
पर्जन्य इव जीमूतैः समन्तात्परिवारितः ॥ ९॥

ऋक्षवन्तं गिरिश्रेष्ठमध्यास्ते नर्मदां पिबन् ।
सर्वर्क्षाणामधिपतिर्धूम्रो नामैष यूथपः ॥ १०॥

यवीयानस्य तु भ्राता पश्यैनं पर्वतोपमम् ।
भ्रात्रा समानो रूपेण विशिष्टस्तु पराक्रमे ॥ ११॥

स एष जाम्बवान्नाम महायूथपयूथपः ।
प्रशान्तो गुरुवर्ती च सम्प्रहारेष्वमर्षणः ॥ १२॥

एतेन साह्यं सुमहत्कृतं शक्रस्य धीमता ।
देवासुरे जाम्बवता लब्धाश्च बहवो वराः ॥ १३॥

आरुह्य पर्वताग्रेभ्यो महाभ्रविपुलाः शिलाः ।
मुञ्चन्ति विपुलाकारा न मृत्योरुद्विजन्ति च ॥ १४॥

राक्षसानां च सदृशाः पिशाचानां च रोमशाः ।
एतस्य सैन्ये बहवो विचरन्त्यग्नितेजसः ॥ १५॥

यं त्वेनमभिसंरब्धं प्लवमानमिव स्थितम् ।
प्रेक्षन्ते वानराः सर्वे स्थितं यूथपयूथपम् ॥ १६॥

एष राजन्सहस्राक्षं पर्युपास्ते हरीश्वरः ।
बलेन बलसम्पन्नो रम्भो नामैष यूथपः ॥ १७॥

यः स्थितं योजने शैलं गच्छन्पार्श्वेन सेवते ।
ऊर्ध्वं तथैव कायेन गतः प्राप्नोति योजनम् ॥ १८॥

यस्मान्न परमं रूपं चतुष्पादेषु विद्यते ।
श्रुतः संनादनो नाम वानराणां पितामहः ॥ १९॥

येन युद्धं तदा दत्तं रणे शक्रस्य धीमता ।
पराजयश्च न प्राप्तः सोऽयं यूथपयूथपः ।
यस्य विक्रममाणस्य शक्रस्येव पराक्रमः ॥ २०॥

एष गन्धर्वकन्यायामुत्पन्नः कृष्णवर्त्मना ।
पुरा देवासुरे युद्धे साह्यार्थं त्रिदिवौकसाम् ॥ २१॥

यस्य वैश्रवणो राजा जम्बूमुपनिषेवते ।
यो राजा पर्वतेन्द्राणां बहुकिंनरसेविनाम् ॥ २२॥

विहारसुखदो नित्यं भ्रातुस्ते राक्षसाधिप ।
तत्रैष वसति श्रीमान्बलवान्वानरर्षभः ।
युद्धेष्वकत्थनो नित्यं क्रथनो नाम यूथपः ॥ २३॥

वृतः कोटिसहस्रेण हरीणां समुपस्थितः ।
एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥ २४॥

यो गङ्गामनु पर्येति त्रासयन्हस्तियूथपान् ।

हस्तिनां वानराणां च पूर्ववैरमनुस्मरन् ॥ २५ ॥

एष यूथपतिर्नेता गच्छन्गिरिगुहाशयः ।
हरीणां वाहिनी मुख्यो नदीं हैमवतीम् अनु ॥ २६ ॥

उशीर बीजमाश्रित्य पर्वतं मन्दरोपमम् ।
रमते वानरश्रेष्ठो दिवि शक्र इव स्वयम् ॥ २७ ॥

एनं शतसहस्राणां सहस्रमभिवर्तते ।
एष दुर्मर्षणो राजन्प्रमाथी नाम यूथपः ॥ २८ ॥

वातेनेवोद्धतं मेघं यमेनमनुपश्यसि ।
विवर्तमानं बहुशो यत्रैतद्बहुलं रजः ॥ २९ ॥

एतेऽसितमुखा घोरा गोलाङ्गूला महाबलाः ।
शतं शतसहस्राणि दृष्ट्वा वै सेतुबन्धनम् ॥ ३० ॥

गोलाङ्गूलं महावेगं गवाक्षं नाम यूथपम् ।
परिवार्याभिवर्तन्ते लङ्कां मर्दितुमोजसा ॥ ३१ ॥

भ्रमराचरिता यत्र सर्वकामफलद्रुमाः ।
यं सूर्यतुल्यवर्णाभमनुपर्येति पर्वतम् ॥ ३२ ॥

यस्य भासा सदा भान्ति तद्वर्णा मृगपक्षिणः ।
यस्य प्रस्थं महात्मानो न त्यजन्ति महर्षयः ॥ ३३ ॥

तत्रैष रमते राजन्रम्ये काञ्चनपर्वते ।
मुख्यो वानरमुख्यानां केसरी नाम यूथपः ॥ ३४ ॥

षष्टिर्गिरिसहस्राणां रम्याः काञ्चनपर्वताः ।
तेषां मध्ये गिरिवरस्त्वमिवानघ रक्षसाम् ॥ ३५ ॥

तत्रैते कपिलाः श्वेतास्ताम्रास्या मधुपिङ्गलाः ।
निवसन्त्युत्तमगिरौ तीक्ष्णदंष्ट्रानखायुधाः ॥ ३६ ॥

सिंह इव चतुर्दंष्ट्रा व्याघ्रा इव दुरासदाः ।
सर्वे वैश्वनरसमा ज्वलिताशीविषोपमाः ॥ ३७ ॥

सुदीर्घाञ्चितलाङ्गूला मत्तमातङ्गसंनिभाः ।
महापर्वतसङ्काशा महाजीमूतनिस्वनाः ॥ ३८ ॥

एष चैषामधिपतिर्मध्ये तिष्ठति वीर्यवान् ।
नाम्ना पृथिव्यां विख्यातो राजञ्शतबलीति यः ।
एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥ ३९ ॥

गजो गवाक्षो गवयो नलो नीलश्च वानरः ।
एकैक एव यूथानां कोटिभिर्दशभिर्वृतः ॥ ४० ॥

तथान्ये वानरश्रेष्ठा विन्ध्यपर्वतवासिनः ।
न शक्यन्ते बहुत्वात्तु सङ्ख्यातुं लघुविक्रमाः ॥ ४१ ॥

सर्वे महाराज महाप्रभावाः
सर्वे महाशैलनिकाशकायाः ।
सर्वे समर्थाः पृथिवीं क्षणेन
कर्तुं प्रविध्वस्तविकीर्णशैलाम् ॥ ४२ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com